# संस्कृतमहाकाव्येषु स्त्रीशिक्षाधिकारः

डॉ0 योगिता
कुरुक्षेत्र विश्वविद्यालय,
कुरुक्षेत्र।

मानवस्य सर्वाङ्गीणविकासस्य प्रमुखमाध्यमः शिक्षैव। प्राचीनभारतीयसमाजे शिक्षायाः क्षेत्रे नारीणां स्थितिः उत्तमा आसीत्। परं यथा—यथा स्त्रियायाः धार्मिकाधिकाराणां ह्रासोऽभवत् तत् परिणामस्वरूपे स्त्रीशिक्षायाः अपि ह्रासोऽभवत्। डॉ. अल्तेकरमते बालिकानां विवाह—आयु न्यूनं सति स्त्री स्त्रीशिक्षायाः पतने उत्तरोत्तरवृद्धिर्कारणं परं महाकाव्ये काले एवं कुत्रापि दृष्टिगोचरन्न भवति कांश्चन प्रसंगान् परित्यज्य महाकाव्यकालीन कन्याः विवाहसमये युवावस्थां प्राप्ता आसन्। अनेन एवमेव तात्पर्यं यत् तत्कालीनाः कन्याः शिक्षिताः बुद्धिमतयो व्यावहारिक—ज्ञानात् च अभिज्ञाः आसन् अतैव कन्या स्वकीय—जीवने अतिमहत्वपूर्णनिर्णये स्वतन्त्रता आसीत्।

अत एव संक्षेपेण कथितं यत् महाकाव्यकाले अथवा तत् पूर्वं स्त्रियः शिक्षाधिकारः प्राप्तः। महाराज विराट् पुत्री उत्तरा नृत्य—शिक्षणार्थ यदा बृहण्णलायाः निर्वाचनं पूर्व तस्याः परीक्ष आदताः। अनेनैव सि;यति तत्कालीनां बालिकानां शिक्षाभवत् महाकाव्येषु दासीः चतुर्षष्ठिः कलाषु निपुणाः नायिकाः तु उच्चकुलसम्बन्धाः आसन् अतः ताः सर्वाः शिक्षिताः आसन्। महाकाव्यकाले कन्यां सर्वप्रथमं गृहविज्ञानस्य शिक्षा, व्यावसायिक शिक्षा, धर्मिकीशिक्षा, आध्यात्मिकी शिक्षा राजनैतिकी शिक्षापि प्रदत्ताः। केवलं साहित्यैव नपरं मूर्तिकलायामपि स्त्रियाः निपुणाः आसन्।

चतुर्थशताब्देः रचनाकारः हारीत मते स्त्रियः शिक्षा अवश्यमेव प्रदत्ता सा शिक्षा स्वगृहे अथवा गृहात्बहिः। अर्थशास्त्र रचनाकारो चाणक्यः एव कामसूत्र रचयिता वात्स्यायनः अपि स्त्रियः गणिकानादीन् च प्रशिक्षायाः उल्लेख कृतः।

व्यवहारिक शिक्षान्तर्गते गृहविज्ञानस्य अतिमहत्त्वमासीत्। कन्याराजपरिवारस्य अथवा मध्यवर्गीय परिवारस्य भवेत् सर्वाः एवं गृहकार्यस्य सम्पूर्णाज्ञानपेक्षासीत्ं पुष्पमालानिर्मितम्, प्रसाध ननिर्मितम्। केशवसज्जादेः कार्यं यद्यपि धनीकुलेषु कुलदास्याः अकुर्वन्। परन्तु आपात्काले राजकुलनार्यः अपि उपर्युक्तं कार्यान् अर्कुवन्। महाभारते द्रौपद्याः रैरन्ध्रीरूपे उत्तरायाः मातु केशसज्जादि कृता।

महाकाव्येषु आतिथ्यसेवायाः अपि महत्वपूर्णस्थानमस्ति तपश्चर्यायामपि अतिथिसेवां प्रमुखकर्तव्यरूपे स्वीकृता। तपसंलग्नापार्वतीमपि अतिथिसेवामग्रणीरासीत्।

वात्स्यायनानुसारेण बालिकान् व्यावहारिकज्ञानस्य शिक्षा प्राग्यौवनात् प्रदत्ता। अभ्यासप्रयोज्यांश्च चातुषष्टिकान् योगान् कन्या रहस्यैकाकिन्नयसेत्।

महाकाव्यकालीनस्त्रियः शिक्षायामग्रणीरासीत्। आसु कलासु वाद्य काव्य चित्रकलादेश्च महवपूर्णं स्थानमासीत्। उच्चकुलेषु आसु कलासु अत्यधिकं ध्यानं प्रदीयतेस्म।

अश्वघोषविरचित–बुद्धिचरिते प्रसिद्धनृत्यांगना आम्रपालीं विधिवत् उपदेशं कृत्वा बुद्धः तस्यां तुतोपैवं वर्णनं प्राप्तम्।

श्रीहर्षो गन्धर्वस्त्रियो नारदस्य शिष्याः कथितवान् ताः संगीतविद्यायां प्रवीणाः आसन्।

बालिकानां व्यावहारिकाशिक्षया सह धार्मिकी शिक्षापि प्रदत्ता। श्रीरामस्य राज्याभिषेके कौशल्यया मन्त्रोचारणपूर्वकम् आहुतिदत्तं तथा बालिसुग्रीव युद्धे तपारा मन्त्रोच्चारणपूर्वक स्वास्त्यायन यज्ञं कृतं इमाः प्रमाणाः।

महाभारते शान्तिपर्वे–सम्पूर्णाध्यायैव स्त्रियाः दर्शनविषयक विद्वतायाः परिचायकः। द्रौपदी अपि राजनैतिकज्ञानेन सह दार्शनिक तत्वान् अपि अजानत् अजातशत्रोः पत्निभिः सह तथा नन्दस्य मात्रा मोक्षस्य दीक्षां ग्रहणमादयः स्त्रीणां ईशप्रति प्रेम दर्शनम् अभिष्टफल प्राप्त्यर्थ स्त्रियः धार्मिकाः आसन्। तथा सन्ध्यावन्दसमये वैदिक–मन्त्रोच्चारणमपि अकुर्वन्।

वात्स्यायनानुसारेण दासित्वादि कर्मेषु स्त्रियः चतुषष्टि कलासु निपुणाः। दास्यः स्वस्वामिनं प्रतिहित–अहितस्य च विचारं कृत्तैव स्वामीसम्मुखं किंचित् वक्तुमाज्ञा अयाचन।

सृष्ट्यारम्भादेव स्त्रियः स्वपत्या सह विभिन्नकार्योषु सक्रियाः आसन्। गृहस्थक्षेत्रे, राजनैतिक क्षेत्रे, रणक्षेत्रे सामाजिकजीवने प्रविष्टे च कन्यां वधुरूपेण साम्राज्ञीभव आशीर्वादं प्रदत्तम्।

रघुवंशस्यान्तिमश्लोकेषु चित्रणं यत् पत्युः मृत्योः भूपस्य पटरानी सिंहासने आरूढ़ तथा विश्वस्तानां मन्त्रीणां सहयोगेन राजकार्यं विधिवत् अकरोत्। किरातार्जुनीये द्रौपदीः राजनैतिकज्ञानेन परिपूर्ण वाक्यं कथितम्। द्रौपद्याः पाण्डित्यपूर्णं गम्भीरराजनैतिकचर्चाश्रुत्वा महाबलीभीमः कथियति यत् द्रौपद्याः विचाराः तु बृहस्पत्यैरपिविस्मयस्य कारणम् अर्थात् अकाट्याः सन्ति।

महाकाव्यानामनुशीलनेन निश्चितरूपेण कथितुं शक्यते यत् महाकाव्यकालीन नारी शिक्षिता आसीत्।

विल्हणेन कश्मीरस्य स्त्रीणां प्रशंसायां कथितं यत् ताः संस्कृतभाषां प्राकृतभाषान्च धाराप्रवाहे अवदन्।

स्त्रीभिः स्वयं यज्ञानुष्ठानं वरचयनसमये वरस्य योग्यतायाः निरीक्षणं कृत्वा वरचयनं कृतम्। स्त्रीणामाचरणं वैदुष्यपूर्णसंवाद च कृतम् तथ्यैतत् पुष्टिं करोति यत् महाकाव्यकालीन नारी निश्चितरूपेण सुशिक्षित आसीत्।

सन्दर्भाः

1. नलदमयन्ती स्वंयवर, नैषध, अज–इन्दुमतीस्वयंवर–रघु
2. तत्र...........च भैक्षचर्येति (स्मृति चन्द्रिका)
3. कलोज्ञानानि ...............कुर्यात।
4. प्राग्यौवनात् .......पत्युरभिप्रायात्। का. सू.
5. तमतिथेयी...............क्रियाः।।